National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2016; 1(6): 75-78
© 2016 NJHSR
www.sanskritarticle.com

**आचार्यः चक्रवर्ती रङ्गनाथन्**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**आचार्यः चक्रवर्ती रङ्गनाथन्**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# यादवाभ्युदये चित्रसर्गसौन्दर्यपरामर्शः

**आचार्यः चक्रवर्ती रङ्गनाथन्**

संस्कृतवाङ्मये साहित्यशास्त्रम् अद्वितीयं स्थानम् आवहति। तत्र साहित्यशास्त्रगगने काव्यनक्षत्राणि बहूनि राजन्ते। तानि च काव्यानि नानाप्रजोजनयुक्तानि। उक्तं च साहित्यदर्पणे

*चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।*
*काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥*[1]

काव्यरचनेन काव्यपठनेन च धर्मार्थकाममोक्षाः सुलभतया प्राप्तुं शक्यन्ते, तदपि सुकुमारबुद्धीनामपि सुलभतया काव्याल्लभ्यन्ते इति काव्यस्यैव माहात्म्यमेतत्। तादृशं काव्यं बहुभिः आलङ्कारिकैः बहुधा विभक्तम्। तत्र मम्मटाचार्याः इत्थं प्राहुः। काव्यं त्रिविधम् – उत्तमम्, मध्यमम्, अधमम् चेति।

उत्तमकाव्यम्-

*इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः।*[2]

यत्र वाच्यार्थापेक्षया व्यङ्ग्यस्य प्राधान्यं भवति तदुत्तमं काव्यम्।

मध्यमकाव्यम्-

*अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।*[3]

यत्र व्यङ्ग्यं गुणीभूतं नाम वाच्यार्थापेक्षया अप्रधानं भवति तन्मध्यमकाव्यम्।

अधमकाव्यं च इत्थं निरुक्तम्

*शब्दचित्रं वाच्यचित्रम् अव्यङ्ग्यं त्ववरं स्मृतम्।*[4]

चित्रकाव्यम् अधमकाव्यमित्युच्यते। तत्र चित्रं नाम गुणालङ्कारैः युक्तम्। यत्र स्फुटप्रतीयमानार्थः न भवति तत् अधमकाव्यम्। अधमकाव्यं द्विविधं भवति। शब्दचित्रं वाच्यचित्रमिति च। शब्दचित्रं नाम सशब्दालङ्कारम्।

शब्दालङ्काराश्च षट् प्रसिद्धाः

*वक्रोक्तिरप्यनुप्रासो यमकं श्लेषचित्रके।*
*पुनरुक्तवदाभासः शब्दालङ्कृतयस्तु षट्॥*[5]

वक्रोक्तिः अनुप्रासः यमकालङ्कारः श्लेषालङ्कारः चित्रालङ्कारः पुनरुक्तवदाभासः इति शब्दालङ्काराः षट् प्रसिद्धाः।

**यादवाभ्युदये चित्रसर्गः**

कवितार्किककेसरिणः इति विख्याताः श्रीमन्तः श्रीवेदान्तदेशिकेन्द्राः लोकहिताय श्रीवैष्णव-सम्प्रदाये नैकान् ग्रन्थान् व्यरचयन्। श्रीमान् वेदान्तदेशिकः विशिष्टाद्वैतसिद्धान्तस्य परमः आचार्यः, महाकविः, तार्किकशिखामणिः च आसीत्। तस्य अतुलनीयं पाण्डित्यं दृष्ट्वा सः **'कवितार्किकसिंहः'** (कविषु तार्किकेषु च सिंहः इव) तथा **'सर्वतन्त्रस्वतन्त्रः'** इति बिरुदाभ्यां विभूषितः अभवत्। तस्य व्यक्तित्वं ग्रन्थचातुर्यं च वर्णयन् तदीयः प्रसिद्धः तनिअन-श्लोकः एवं श्रूयते—

*"श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।*
*वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥"*

सः शताधिकानां ग्रन्थानां रचयिता आसीत्, येषु 'पादुकासहस्रम्', 'रहस्यत्रयसारः', 'यादवाभ्युदयमहाकाव्यम्' च प्रमुखाः। तस्य कृतयः न केवलं पाण्डित्यपूर्णाः, अपि तु रसवत्यः सन्ति।

'यादवाभ्युदयम्' इति महाकाव्यं कवितार्किकसिंहेन श्रीमद्वेदान्त-देशिकेन विरचितम् अस्ति। इदं संस्कृतसाहित्यस्य एकं देदीप्यमानं रत्नं वर्तते। अस्मिन् काव्ये चतुर्विंशतिः (२४) सर्गाः सन्ति, यत्र यदुकुलतिलकस्य भगवतः श्रीकृष्णस्य पावनं चरित्रं, तस्य लीलाः, गुणाः च अतीव मनोज्ञशैल्या वर्णिताः सन्ति।

अस्य काव्यस्य प्रौढिमा अनेनैव ज्ञायते यत् सुप्रसिद्धः शैवाद्वैतविद्वान् श्रीअप्पय्यदीक्षितः मतभेदं विहाय अस्य ग्रन्थस्य कृते व्याख्यानम् (टीकाम्) अलिखत्। सः वेदान्तदेशिकस्य प्रशंसायां वदति—

*"इत्थं विचिन्त्याः सर्वत्र भावाः सन्ति पदे पदे ।*
*कवितार्किकसिंहस्य काव्येषु ललितेष्वपि ॥"*

नाम यद्यपि इमानि काव्यानि ललितानि सन्ति, तथापि कवितार्किकसिंहस्य रचनासु पदे पदे गभीराः भावाः चिन्तनीयाः विलसन्ति।

श्रीमद्वेदान्तदेशिकविरचितस्य यादवाभ्युदयमहाकाव्यस्य षष्ठः सर्गः "चित्रसर्गः" इति नाम्ना सुविख्यातः वर्तते । अस्मिन् सर्गे महाकविना भगवतः श्रीकृष्णस्य लीलाः तथा ऋतूनां वर्णनं कुर्वता अद्भुतं शब्दचित्रकौशलं प्रादर्शि।

**यादवाभ्युदये शब्दालङ्काराः**

पूर्वोक्तेषु षट्सु शब्दालङ्कारेषु अनुप्रास-यमक-श्लेष-चित्रालङ्का-राणां प्रयोगः अत्र षष्ठे सर्गे दरीदृशयते।

तत्र अनुप्रासो नाम –

*वर्णसाम्यमनुप्रासः*[6]

यत्र श्लोके वर्णानां सादृश्यं भवति तत्र अनुप्रासः इति अलङ्कारः। स च वृत्त्यनुप्रासः लाटानुप्रासः छेकानुप्रास इति त्रिविधः प्रकीर्तितः।

यमकं यथा –

*अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः।*
*यमकं पादतद्भागवृत्ति तद्यात्यनेकताम्॥*[7]

इति यमकलक्षणम्। यमकालङ्कारस्य बहवो भेदास्सन्ति। मुखं संदशः आवृत्तिः गर्भं सन्दष्टकम् इत्यादिरूपेण। दिङ्मात्रमत्र उदाहरणानि प्रदर्श्यन्ते।

*शमयता पुरुहूतमहोत्सवं व्रजपतिः सह वल्लवयूथपैः।*
*निभृतमञ्जुगिरा निजसूनुना **निजगदे जगदे**ककुटुम्बिना॥*[8]

सर्गस्य आरम्भ एव अनेन सुन्दरेण श्लोकेन महाकविनाकारि। अत्र इन्द्रपूजनं मास्तु तदपेक्षया गोवर्धनगिरेः पूजा विधेया इति कृष्णः नन्दाय ब्रूते इति श्लोकस्यार्थः। अत्र श्लोके एकपादभागावृत्तियमका-लङ्कारो वर्तते। अत्र निजगदे जगदेककुटुम्बिना इत्यत्र जगदे जगदे इति शब्दानुपूर्वी समाना तथापि अर्थभेदो वर्तते।

अत्र यमकस्य वैविध्यं दृश्यते। कविना क्वचित् द्व्यक्षरश्लोकः केवलं द्वाभ्यां वर्णाभ्यां रचितः, क्वचित् एकाक्षरश्लोकः यथा 'द' इति वर्णमात्रेण निर्मितः श्लोकः अपि रचितः। उदाहरणानि यथा

**द्व्यक्षरश्लोकः**

केवलं द्वयोः वर्णयोः एव प्रयोगेन सार्थकः रसयुक्तश्च श्लोको रचयितुं शक्यः इति इदं वैचित्र्यं संस्कृतभाषायाः भूषणम्। अत्र च एते महाकवयः एतादृशानद्भुतान् बहून् श्लोकान् न अस्मिन्नेव काव्ये अपि तु पादुकासहस्रादिग्रन्थेष्वपि व्यरचयन् इति कवेः प्रतिभा प्रभाति।

*सरासससारसासारैः सूरोस्रसरुसारसैः ।*
*रससूः सरसस्रंसैः सरःसाररसैरसौ ॥*[9]

सवृन्दं सञ्चरद्भिः सारसपक्षिभिः सूर्यकिरणैः विकसितैः कमलैः, मधुरजलपूर्णैः सरोभिः च अयं गोवर्धनपर्वतः जनानां प्रीतिं जनयति इति श्लोकस्य भावः। अत्र श्लोके 'स' तथा 'र' इति वर्णद्वयम् एव प्रयुक्तम्। अत इदं **द्व्यक्षरवर्णचित्रम्**।

एवमेव

*" चारुचीरीरुचारोचीरुरुचारैरचर्चरुः ।*
*चिरोच्चरोचिरचरो रुचिरो रुचिराचरः ॥*[10]

अस्मिन् श्लोके केवलं 'च' तथा 'र' इति द्वौ एव वर्णौ प्रयुक्तौ। अतः इदं द्व्यक्षरचित्रम्।

**दन्त्यद्व्यक्षरश्लोकः**

*नीतिनेतृनतानन्तनितान्तोन्नततानतः ।*
*तातेतोतनुतोनीतं ननुत्तेनोनुतां ततः ॥*[11]

अत्र 'न' तथा 'त' इति दन्त्यवर्णद्वयमेव प्रयुक्तम्। अतः दन्त्यद्व्यक्षरचित्रम्।

एवमेव अत्र सर्गे द्वितीयचतुर्थपादभागावृत्तियमकं, पादचतुष्कभागा-वृत्तियमकम् इत्यादिभेदाः अपि द्रष्टव्याः।

**चित्रालङ्कारः**

*तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता॥*

*सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्ग-मुरज-पद्माद्याकार-मुल्लसयन्ति तच्चित्रं काव्यम्।*[12]

यत्र श्लोके वर्णानां विन्यासः खड्गाद्याकृतीः सम्पादयति तत्र चित्रालङ्कारो भवति।

अस्मिन् सर्गे कविना बहवः क्लिष्टाः सुन्दराः च बन्धाः रचिताः, येषु अक्षराणां विन्यासेन चित्राणि निर्मीयन्ते। तेषु प्रमुखाः सन्ति—

- **चक्रबन्धः**: अत्र श्लोकस्य अक्षराणि चक्राकारेण दृश्यन्ते।
- **पद्मबन्धः**: अत्र अक्षराणि अष्टदलकमलस्य आकारं धारयन्ति।
- **मुरजबन्धः**: वाद्यविशेषस्य (मृदङ्गस्य) आकारेण अक्षरविन्यासः।

- **गोमूत्रिकाबन्धः:** वक्रगत्या अक्षरयोजना यत्र तत्र गोमूत्रबन्धः।
- **सर्वतोभद्रः:** यः श्लोकः उपरिष्टात्, अधस्तात्, वामतः, दक्षिणतः च पठनेन समानः भवति तत्र सर्वतोभद्रः।
- **खुरबन्धः**

*"सभाजनं वदाम्येतद् गव्यैः सरसभाजनम् ।*

*सभाजनं गिरेरर्घ्यं स्ववृत्त्युल्लासभाजनम् ॥*[13]




श्लोकस्य अर्थः इत्थं वर्तते - हे सभासदाः! अहं वदामि यत् अस्माकं जीवनवृत्तेः आधार-भूतस्य अस्य गोवर्धनगिरेः पूजनं दधिक्षीरादिभिः पूर्णैः पात्रैः कर्तव्यम्। इदमेव अस्माकं कृते श्रेयस्करम्। अत्र **'खुरबन्धः'** इति चित्रालङ्कारः वर्तते। अत्र वर्णानां विन्यासः खुररूपेण भवति।अत्र अयं विशेषः यत् अस्मिन् श्लोके 'सभाजनम्' इति पदं चतुर्षु पादेषु यमकरूपेण प्रयुक्तम्।

- **गोमूत्रिकाबन्धः**

*वर्णानामेकरूपत्वं यद्येकान्तरमर्धयोः ।*

*गोमूत्रिकेति तां तत्प्राहुर्दुष्करं तद्विदो विदुः ॥*[14]

पूर्वोत्तरार्धयोः समाक्षराणि समानानि सन्ति, तानि अधः कोष्ठकेषु लेखनीयानि। विषमाक्षराणि उपरिष्टात् लेखनीयानि। तदा गोमूत्रिकारेखाचित्रं जायते।

*"देवस्थानमिवेन्धानं परायणमवारितम् ।*

*गोवर्धनमवेह्योनं नारायणमिवागतम् ॥"*[15]



अत्र **गोमूत्रिकाबन्धः** अस्ति।

श्लोकस्य अर्थः च अयं गोवर्धनगिरिः स्वर्गवत् प्रकाशते। शरणागतानाम् अयमेव रक्षकः। अस्माकं पूजार्थम् अवतीर्णः साक्षात् नारायणः एव अयं गिरिः इति मन्यताम्।।

एवमेव अत्रापि गोमूत्रिकाबन्धो दृश्यते

*"मोघाशो मघवान् देवः स्यादत्रत्यस्य सादने ।*

*मेघानामपि वा भावः सादमेत्यद्रिसादने ॥"*[16]



- **सर्वतोभद्रम्**

*प्रतिलोमानुलोमत्या प्रतिमात्रं गतागतैः ।*

*सर्वाभिमुखमाभाति यत्तत्सर्वतोभद्रमुच्यते॥*[17]

तत् काव्यं यत् सर्वतः नाम अग्रतः, पृष्ठतः, उपरितः, अधस्तः च पठने समानमेव दृश्यते तत्र सर्वतोभद्रमिति चित्रालङ्कारो भवति।

*मायाभासा साभायामा यायाभासा साभायाया ।*

*भासाभासा साभासाभा सायाभासा साभायासा ॥"*[18]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| मा | या | भा | सा | सा | भा | या | मा |
| या | सू | ता | या | या | ता | सू | या |
| भा | ता | या | या | या | या | ता | भा |
| सा | या | या | गे | गे | या | या | सा |
| सा | या | या | गे | गे | या | या | सा |
| भा | ता | या | या | या | या | ता | भा |
| या | सू | ता | या | या | ता | सू | या |
| मा | या | भा | सा | सा | भा | या | मा |

अत्र **सर्वतोभद्रम्** इति चित्रबन्धः। अत्र कोष्ठकेषु उपरिष्टात्, अधस्तात्, पार्श्वतः च पठने समानमेव वाक्यं लभ्यते।

*सेवा माननमावासे वासिताहिहितासिवा।*

*माता पिता तापितामा नहिताततता हि न॥*[19]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| से | वा | मा | न | न | मा | वा | से |
| वा | सि | ता | हि | हि | ता | सि | वा |
| मा | ता | पि | ता | ता | पि | ता | मा |
| न | हि | ता | त | त | ता | हि | न |
| न | हि | ता | त | त | ता | हि | न |
| मा | ता | पि | ता | ता | पि | ता | मा |
| वा | सि | ता | हि | हि | ता | सि | वा |
| से | वा | मा | न | न | मा | वा | से |

अत्रापि सर्वतोभद्रचित्रबन्धः।

- **अर्धभ्रमकम्**

अर्धभ्रमकस्य लक्षणं काव्यदर्शे प्रोक्तं

*प्राहुरर्धभ्रमं नाम श्लोकार्धभ्रमणां यदि*[20]

यत्र श्लोकस्य एकस्य पादस्य अर्धभागः यदा भ्रमितः तदा तेनैव क्रमेण श्लोकः पूर्यते तत्र अर्धभ्रमकमी चित्रकाव्यम्। यथा

*नदीसारसमेतात्र दीप्ता भासा नरावृता। साभानासौ माभिरामे रसा सौम्या सुमानस॥*[21]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| न 1 | दी 9 | सा 17 | र 25 | स 33 | मे 24 | ता 16 | त्र 8 |
| दी 2 | प्ता 10 | भा 18 | सा 26 | न 31 | रा 23 | वृ 15 | ता 7 |
| सा 3 | भा 11 | ना 19 | सौ 27 | मा 30 | भि 22 | रा 14 | मे 6 |
| र 4 | सा 12 | सौ 20 | म्या 28 | सु 29 | मा 21 | न 13 | स 5 |

अत्र श्लोकस्य अर्थः एवमस्ति - नवरत्नकान्त्या दीप्यमाना, नदीभिः युक्ता, रमणीया इयं गोवर्धनभूमिः अस्ति।

अत्र **अर्धभ्रमकम्** इति चित्रम्। अस्य पादानां अर्धभागः भ्रमितः सन् श्लोकपूर्तिं करोति। सर्वतोभद्रवत् सम्पूर्णभ्रमणं नास्ति।

- **अष्टदलपद्मबन्धः**

*कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च ।*

*प्रवेश निर्गमौ दिक्षु कार्यविष्टदलाम्बुजे ॥*[22]

इति अष्टदलपद्मबन्धस्य लक्षणं भवति। यत्र कर्णिकायां प्रथममक्षरं,

दलेषु अन्यानि अक्षराणि च विन्यस्य क्रमेण पठने श्लोकः सिध्यति तत्र अयं बन्धः। यथा

*वासे नास्मिन्पूजादेवा वादे जातातोद्यारावा।*
*वाराद्याविर्भूताजीवा वाजीतात्रादीना सेवा॥*[23]




हे विद्वत्सुत! अस्माकं निवासरूपे अस्मिन् पर्वते वाद्यघोषपुरस्सरं क्रियमाणा पूजा देवरहिता न भवति। अतः घृतक्षीरादिसमृद्धैः उपहारैः क्रियमाणा इयम् उदारा सेवा अस्माकं जीवनोपायं कल्पयिष्यति। अत्र **अष्टदलपद्मबन्धः** वर्तते। कर्णिकायां प्रथममक्षरं, दलेषु अन्यानि अक्षराणि च विन्यस्य क्रमेण पठने श्लोकः सिध्यति।

एवं श्रीमद्वेदान्तदेशिकानां रचनासु सर्वत्रापि वैलक्षण्यं वैविध्यं वैशिष्ट्यं च द्रष्टुं शक्यत इति दिक्।

**सन्दर्भग्रन्थसूची**


1. साहित्यदर्पणः
2. काव्यप्रकाशः
3. यादवाभ्युदयम्
4. काव्यादर्शः


**पाद टिप्पणी**

[1]साहित्यदर्पणः 1-4

[2]काव्यप्रकाशः 1- 3

[3]काव्यप्रकाशः 1-4

[4]काव्यप्रकाशः 1- 5

[5]काव्यप्रकाशः -

[6]काव्यप्रकाशः – 9- 79

[7]काव्यप्रकाशः – 9- 83

[8]यादवाभ्युदयम्- 6 -1

[9]यादवाभ्युदयम्- 6 -80

[10] यादवाभ्युदयम्- 6 -78

[11] यादवाभ्युदयम्- 6 -79

[12] काव्यप्रकाशः – 9- 85

[13] यादवाभ्युदयम् – 6 - 52

[14] काव्यादर्शः – 3 - 78

[15] यादवाभ्युदयम् – 6 - 55

[16] यादवाभ्युदयम् – 6 - 56

[17] काव्यादर्शः 3-82

[18] यादवाभ्युदयम् – 6 - 99

[19] यादवाभ्युदयम् – 6 - 100

[20] काव्यादर्शः – 3-80

[21] यादवाभ्युदयम् – 6 - 102

[22] यादवाभ्युदयम् – 6 - 102